# ॥ नारदस्तुतिः ॥

## नारद उवाच

देवदेव जगन्नाथ परमात्मन् सनातन।
नारायणाखिलाधार विश्वसाक्षिन्नमोऽस्तु ते॥ ३४॥

विशुद्धज्ञानरूपोऽपि त्वं लोकानतिवञ्चयन्।
मायया मनुजाकारः सुखदुःखादिमानिव॥ ३५॥

त्वं मायया गुह्यमानः सर्वेषां हृदि संस्थितः।
स्वयञ्ज्योतिः स्वभावस्त्वं व्यक्त एवामलात्मनाम्॥ ३६॥

उन्मीलयन् सृजस्येतन्नेत्रे राम जगत्त्रयम्।
उपसंह्रियते सर्वं त्वया चक्षुर्निमीलनात्॥ ३७॥

यस्मिन् सर्वमिदं भाति यतश्चैतच्चराचरम्।
यस्मान्न किञ्चिल्लोकेऽस्मिंस्तस्मै ते ब्रह्मणे नमः॥ ३८॥

प्रकृतिं पुरुषं कालं व्यक्ताव्यक्तस्वरूपिणम्।
यं जानन्ति मुनिश्रेष्ठास्तस्मै रामाय ते नमः॥ ३९॥

विकाररहितं शुद्धं ज्ञानरूपं श्रुतिर्जगौ।
त्वां सर्वजगदाकारमूर्तिं चाप्याह सा श्रुतिः॥ ४०॥

विरोधो दृश्यते देव वैदिको वेदवादिनाम्।
निश्चयं नाधिगच्छन्ति त्वत्प्रसादं विना बुधाः॥ ४१॥

मायया क्रीडतो देव न विरोधो मनागपि।
रश्मिजालं रवेर्यद्वद्दृश्यते जलवद्भ्रमात्॥ ४२॥

भ्रान्तिज्ञानात्तथा राम त्वयि सर्वं प्रकल्प्यते।
मनसोऽविषयो देव रूपं ते निर्गुणं परम्॥ ४३॥

कथं दृश्यं भवेद् देव दृश्याभावे भजेत्कथम्।
अतस्तवावतारेषु रूपाणि निपुणा भुवि॥ ४४॥

भजन्ति बुद्धिसम्पन्नास्तरन्त्येव भवार्णवम्।
कामक्रोधादयस्तत्र बहवः परिपन्थिनः॥ ४५॥

भीषयन्ति सदा चेतो मार्जारा मूषकं यथा।
त्वन्नाम स्मरतां नित्यं त्वद्रूपमपि मानसे॥ ४६॥

त्वत्पूजानिरतानां ते कथामृतपरात्मनाम्।
त्वद्भक्तसङ्गिनां राम संसारो गोष्पदायते॥४७॥

अतस्ते सगुणं रूपं ध्यात्वाऽहं सर्वदा हृदि।
मुक्तश्चरामि लोकेषु पूज्योऽहं सर्वदैवतैः॥४८॥

राम त्वया महत्कार्यं कृतं देवहितेच्छया।
कुम्भकर्णवधेनाद्य भूभारोऽयं गतः प्रभो॥४९॥

श्वो हनिष्यति सौमित्रिरिन्द्रजेतारमाहवे।
हनिष्यसेऽथ राम त्वं परश्वो दशकन्धरम्॥५०॥

पश्यामि सर्वं देवेश सिद्धैः सह नभोगतः।
अनुगृह्णीष्व मां देव गमिष्यामि सुरालयम्॥५१॥

इत्युक्त्वा राममामन्त्र्य नारदो भगवानृषिः।
ययौ देवैः पूज्यमानो ब्रह्मलोकमकल्मषम्॥५२॥

॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे अष्टमे सर्गे नारदस्तुतिः सम्पूर्णा॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Narada_Stuti.

generated on **March 29, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits